# 5 मम विद्यालयः



**राजीवः :** पश्य, अनिल! एषः मम विद्यालयः।

मम विद्यालयः सुन्दरः अस्ति।

**अनिलः :** सत्यम्। विद्यालयः विशालः अपि अस्ति।

**राजीवः :** अहं प्रतिदिनं विद्यालयम् आगच्छामि।

**अनिलः :** विद्यालयस्य आरम्भः कदा भवति ?

**राजीवः :** मम विद्यालयस्य आरम्भः एकादशवादने भवति।

आरम्भे अहं प्रार्थनाखण्डं गच्छामि। तत्र अहं प्रार्थनां करोमि।

**अनिलः :** भवतः वर्गखण्डः कुत्र अस्ति ?



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**राजीवः :** मम वर्गखण्डः प्रार्थनाखण्डस्य समीपे एव अस्ति।

**अनिलः :** भवतः वर्गशिक्षकः कः अस्ति?

**राजीवः :** हर्षामहोदया मम वर्गशिक्षिका अस्ति। सा संस्कृतं पाठयति।

**अनिलः :** भवतः विद्यालये पुस्तकालयः अस्ति वा ?

**राजीवः :** आम्। अहं पुस्तकालये पुस्तकं पठामि। मम विद्यालये विशालं क्रीडाङ्गणम् अपि अस्ति। विरामसमये अहं तत्र खेलामि।

**अनिलः :** अहो! भवतः विद्यालये रमणीयम् उद्यानम् अपि अस्ति।

**राजीवः :** न केवलम् उद्यानम्। उद्याने 'औषधबागः' अपि अस्ति।

**अनिलः :** भवतः रोपितः वृक्षः अपि अस्ति वा ?

**राजीवः :** आम्। पश्य एषः वृक्षः मया रोपितः अस्ति।

**अनिलः :** उत्तमम्। तर्हि भवान् गृहं कदा गच्छति?

**राजीवः :** अहं सायं पञ्चवादने गृहं गच्छामि।

**अनिलः :** भवतः विद्यालयः ननु सुन्दरः अस्ति।

## Glossary

**पश्य** – look, **एषः** – This, **अस्ति** – is, **आरम्भः** – beginning, **आगच्छामि** – am coming, **कदा** – when, **मम** – my, **गच्छामि** – am going, **कुत्र** – where, **क्रीडाङ्गणम्** – playground, **एव** – same, **ननु** – really, **अहो** – oh ! (to express surprise), **भवति** – happen, **तर्हि** – then, **रोपितः** – sown/planted, **पाठयति** – is teaching.

## Exercise

**1. Pronounce the following words correctly :**

विद्यालयः, प्रतिदिनम्, आगच्छामि, आरम्भः, प्रार्थनाखण्डः, वर्गखण्डः, क्रीडाङ्गणम्, उद्यानम्, उत्तमम्।



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**2. Correct the following sentences on the basis of the lesson given here :**

(1) अनिलस्य विद्यालयः सुन्दरम् अस्ति। ____________________

(2) विद्यालये क्रीडाङ्गणः अस्ति। ____________________

(3) राजीवः पुस्तकालये क्रीडति। ____________________

(4) क्रीडाङ्गणे राजीवः पठति। ____________________

(5) राजीवः नववादने विद्यालयं गच्छति। ____________________

**3. Translate the following sentences into Sanskrit :**

(1) This is my school. ____________________

(2) My school is fine. ____________________

(3) The school begins at 11:00 a.m. ____________________

(4) There is a library in the school. ____________________

(5) I play on the ground during the break. ____________________

**4. Fill in the gaps in the following sentences selecting the appropriate word from the brackets :**

(1) राजीवः __________ वादने गृहं गच्छति। (एकादश, पञ्च)

(2) मम विद्यालयः __________ अस्ति। (सुन्दरः, लघुः)

(3) अहं प्रतिदिनं __________ गच्छामि। (विमानयानम्, विद्यालयम्)

(4) राजीवः __________ पुस्तकं पठति। (क्रीडाङ्गणे, पुस्तकालये)

**Activity :**

- Draw the map of your school and write 5-6 sentences about it :
- Draw the map of your village/town/city.
- Visit a garden or a farm house and make a list of the trees which are used for medicine.



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**Activity :**




- **Fill in the gaps looking at the picture :**


(1) मन्दिरस्य उत्तरे ____________ अस्ति ।

(2) मन्दिरस्य पश्चिमे ____________ अस्ति ।

(3) मन्दिरस्य पूर्वे ____________ अस्ति ।

(4) मन्दिरस्य दक्षिणे ____________ अस्ति ।

- **The following diagram shows directions :**






Get More Learning Materials Here : CLICK HERE www.studentbro.in